## संख्याविवक्षा निर्णयः

**Dr. G. S.V. Dattatreya Murthy**
Assistant Professor
Department of Sanskrit & IC
SCSVMV (Deemed to be university)
Enathur, Kanchipuram - 631561

अस्मिन् व्याकरणशास्त्रे **आर्धधातुकस्येड्वलादेः** इत्यादौ उद्देश्यगतविशेषणस्य वलादित्वस्य विवक्षया प्रपठ्य इत्यादिषु ल्यपः इडागमः वर्यते। **उपेयिवाननश्वाननूचानश्च** इत्यत्र उपेत्यस्य अविवक्षितत्वं स्वीकृत्य ईयिवान् इत्यस्यापि साधुत्वं निरूप्यते। परन्तु तत्रैव नञादिकं विवक्षितमिति स्वीकृत्य विधेये नः इत्यत्र विशेषणीभूतैकत्वस्य अविवक्षायामेव नकारद्वयलाभः सिध्यति। **इको यणची** त्यादौ तु विधेये यणि एकत्वस्य विवक्षणात् नानेकयणप्रसङ्ग इति व्याख्यायते।

**अत्र मीमांसकमतम्**

उद्देश्यगतविशेषणस्य अविवक्षा, विधेयगतस्य तु विवक्षेति ब्रुवन्ति। तथाहि- पशुना यजेत इत्यादौ समानप्रत्ययोपात्तेन प्रातिपदिकादपि प्रधानभूतेन क्रियायां सन्निहितेन च कारकेण एकत्वसंख्यायाः अवरुद्धत्वात्, तदेकत्वं प्रातिपदिकार्थमनादृत्य क्रियाङ्गमवगम्यमानं वाक्यसमर्पितेन क्रियाविशेषेण भावनात्मकेन सम्बध्य, पश्चादेव अरुणाधिकरणन्यायेन प्रातिपदिकार्थेन पशुना सह सम्बध्यते। तत्र च एकवचनस्य च क्रियया सह शाब्दः सम्बन्धः, प्रातिपदिकार्थेन तु आर्थः।एवञ्च तत्र एकत्वस्य विवक्षणात् एकत्वविशिष्टपशोरेव विधानात् नानेकपशुकरणको यागः भवति। एवं विधेयविशेषणं सर्वत्र विवक्षितमेव। उद्देश्यविशेषणस्य तु न विवक्षा। अन्यथा ग्रहं सम्मार्ष्टि इत्यत्र वाक्यभेदप्रसङ्गात्। तथा हि- प्राजापत्याः नवग्रहाः इति वाक्यविहितग्रहोद्देशेन ग्रहं सम्मार्ष्टि इत्यनेन संमार्जनं विधीयते। यत्र च यदि एकत्वस्य विवक्षा स्यात् तर्हि एकमेव ग्रहं सम्मार्ष्टि इत्यर्थः स्यात्। तथा च उद्देश्यानां ग्रहाणामनेकत्वात् प्रतिग्रहमावृत्या वाक्यभेदेन सम्मार्जनं विधेयमिति वाक्यभेदः दुर्वारः। किञ्च पशुना यजेत इत्यत्र यथा पशोः अप्राधान्यम्, एकत्वस्य कारकस्य च प्राधान्यं न तथा ग्रहाणाम् अप्राधान्यम्। ग्रहमिति द्वितीयया ग्रहस्य संस्कार्यत्वलक्षणप्राधान्यप्रतीतेः। एवञ्च प्रधानानां ग्रहाणां बहुत्वात् प्रतिप्रधानं गुणावृत्तिः इति न्यायेन एकत्वविवक्षायां ग्रहं सम्मार्ष्टि इति वाक्यस्य आवृत्तिः कार्या भवतीति वाक्यभेदवारणाय तत्र संख्यायाः अविवक्षा इत्येव युक्तम्। अतश्च उद्देश्यगता संख्या अविवक्षितैव इति सारांशः।

**अत्र शाब्दिकमतसारः**

विधेये विशेषणं विवक्षितमेव। उद्देश्ये तु न नियमः। आकांक्षाद्यनुरोधात् उद्देश्ये **आर्धधातुकस्येड्वलादेः** इत्यादौ विवक्षा, **उपेयिवाननश्वाननूचानश्च** इत्यादावविवक्षा। विधेये विशेषणस्य

संख्यायाः विवक्षितत्वादेव **इको यणची** त्यादौ इक्स्थाने एकस्यैव यणः प्राप्तिः। **रदाभ्यां निष्ठातो नः पूर्वस्य च दः** इत्यादौ नकारद्वयापत्तिरिति नालोचनीयम्। तत्र चशब्दानुरोधात् वाक्यभेदकल्पनया निष्ठातो नः, पूर्वस्य च दः नः इति नकारद्वयसिद्धेः। अयं च वाक्यभेदः भाष्यसम्मत एव। यद्यत्र एकत्वमविवक्षितं चेत् बहुनकारापत्तिः कथं निराकरणीया, न हि तत्र संख्याविवक्षापक्षेपि वाक्यभेदं विना नकारद्वयलाभः। अतश्च वाक्यभेदेन भाष्ये चशब्दप्रत्याख्यानात् तत्र संख्याविवक्षितैव। वस्तुतः पर्यालोच्यमाने उद्देश्ये इव विधेयेपि विशेषणे विवक्षायां न नियमः। यत्र भवत्याकांक्षा अविरोधश्च तत्र विवक्षा। यत्र न तत्र अविवक्षा इत्येव युक्तम्। एवं च **निष्ठातो नः पूर्वस्य च दः** इत्यत्र न संख्या विवक्षिता। न चानेकनकारापत्तिः। एकेन शास्त्रस्य चारितार्थ्ये बहूनामापत्तेः। नकारद्वयलाभस्तु वाक्यभेदादेव भवति।

**********************